प्रथमा दीक्षा : सम्भाषणम्

शाकापणः

आवश्यकम्-पर्याप्तम्

मास्तु- स्वीकरोतु

आपणिकः - आगच्छतु! किम् आवश्यकम् ?

महिला - एतस्य कूष्माण्डस्य एककिलोपरिमितस्य कति रूप्यकाणि ?

आपणिकः - तस्य किलोपरिमितस्य अष्टरूप्यकाणि ।

महिला - अर्धकिलोपरिमितम् आलुकं ददातु ।

आपणिकः - कूष्माण्डः मास्तु वा ?

महिला - किलोद्वयमितं कूष्माण्डं, एककिलोपरिमितं गृञ्जनकम्, अर्धाकिलो महामरीचिकां च ददातु ।

वृन्ताकम् अपि एककिलोपरिमितम् । विण्डीनकानि नष्टानि खलु ? उत्तमानि न आनीतवान् किम्?

आपणिकः - उत्तमानि विण्डीनकानि स्यूते एव सन्ति । आवश्यके किम् ?

महिला - किलोमात्रपरिमितं ददातु । आहत्य कतिरूप्यकाणि इति वदतु शीघ्रं गन्तव्यम् ।

आपणिकः - आहत्य पञ्चसप्ततीरूप्यकाणि । कारवेल्लं मास्तु वा ?

महिला - तिक्तम् इत्यतः कारवेल्लं मम गृहे न खादन्ति । पर्याप्तम् । अस्मिन् स्यूते सर्वाणि स्थापयतु । धनं -स्वीकरोतु ।

आपणिकः -परिवर्तः नास्ति किम् ? अस्तु स्वीकरोतु ।